# 4 एहि सुधीर



एहि सुधिर ! एहि सुविक्रम !
खेलनाङ्गणं गच्छाम ।
धावन-कूर्दन-चलनैः खेलैः
वज्रकायतां विन्दाम ।।

एहि सुशीले ! एहि मृणालिनि !
पुष्पवाटिकां गच्छाम ।
विविधैः कुसुमैर्विधाय मालां
विघ्नविनाशकमर्चाम ।।

एहि दिनेश ! प्रणव ! गणेश !
ज्ञाननिधिं सञ्चिनुयाम ।
एहि शारदे ! गिरिजे ! वरदे
ज्ञानवारिधौ विहराम ।।

तन्वा मनसा हितं चरन्तः
सदा गुरून् अनुगच्छाम ।
भारतमातुः सेवासत्कारः
देशहितार्थं जीवाम ।।

– जनार्दन हेगडे



Get More Learning Materials Here : CLICK HERE www.studentbro.in

## Glossary

**खेलनाङ्गणम्** playground **गच्छाम** (Let us) go **कूर्दन** jump **वज्रकायता** very strong body **पुष्पवाटिका** garden **विधाय** (Let us) prepare **ज्ञाननिधिः** treasure of knowledge **सञ्चिनुयाम** get **ज्ञानवारिधिः** treasure of knowledge **अर्चाम** worship **गिरिजे** parvatidevi **विहराम** wander **चरन्तः** put into execution

**विशेषः**

**कुसुमैर्विधाय** – कुसुमैः विधाय

**विघ्नविनाशकमर्चाम** – विघ्नविनाशकम् अर्चाम

## Exericise

**1. Pronounce the following words orally :**

सुविक्रम, खेलनाङ्गणम्, वज्रकायताम्, मृणालिनि, कुसुमैर्विधाय, सञ्चिनुयाम, ज्ञानवारिधौ, अनुगच्छाम

**2. Complete the following stanza :**

(1) एहि सुधीर ! ______________________ विन्दाम ।।

(2) तन्वा ______________________ जीवाम ।।

(3) एहि दिनेश ______________________ विहराम ।।

**3. Find action verbs from the poem and write them as shown in the example :**

**Illustration :** गच्छाम ____________, ____________

____________, ____________

____________, ____________



Get More Learning Materials Here : CLICK HERE www.studentbro.in

4. **Answer the following questions in Sanskrit :**

(1) वज्रकाटतां कथं विन्दाम ?

(2) कुसुमैः कं अर्चाम ?

(3) कस्य हितार्थं जीवाम ?

(4) सदा कान अनुगचगम ?

5. **Follow the illustration :**

**Illustration :** गच्छ् – गच्छाम

नय् – ________________ पिब् – ________________

अनुगच्छ् – ________________ विन्द – ________________

6. **Find the other songs regarding 'Bharatmata' from the textbooks for std. 6-7 and sing them.**

7. **Draw the relief map of 'Bharatmata'.**

8. **Write the names of the games you play.**

**ज्ञातव्यम्**

- संस्कृतसाहित्यक्षेत्रे अप्रतिमं योगदानाय 'वाल्मीकिपुरस्कारः' दीयते।
- अस्माकं राजमुद्रायाम् अङ्कितः 'सत्यमेव जयते' इति मुद्रालेखः मुण्डकोपनिषदि अस्ति।



Get More Learning Materials Here : CLICK HERE www.studentbro.in